## बहोर्लोपो भू च बहोः । (१५८/२०१७)

बहोरुत्तरेषाम् इष्ठेमेयसां लोपो भवति, तस्य च बहोः स्थाने भू इत्ययमादेशो भवति । भूमा । भूयान् । बहुशब्दः पृथ्वादिषु पठ्यते । बहोरिति पुनर्ग्रहणं स्थानित्वप्रतिपत्त्यर्थम्, अन्यथा [1]हि प्रत्ययानामेव भूभावः स्यात् ॥

## इष्ठस्य यिट् च । (१५९/२०१८)

बहोरुत्तरस्य इष्ठस्य यिडागमो भवति, बहोश्च [2]भूरादेशो भवति । भूयिष्ठः । लोपापवादो यिडागमः, तस्मिन्निकार उच्चारणार्थः ॥

## ज्यादादीयसः । (१६०/२०१९)

[3]ज्यादुत्तरस्य [4]ईयसः आकार आदेशो भवति । ज्यायान् । लोपस्य [5]यिटा व्यवहितत्वात् आत् इत्युच्यते । लोपे हि सति अकृद्यकार इति दीर्घत्वेन ज्यायान् इति सिध्यति ॥

## र ऋतो हलादेर्लघोः । (१६१/१७८८)

[6]रशब्द आदेशो भवति ऋकारस्य हलादेर्लघोः इष्ठेमेयस्सु परतः । प्रथिष्ठः । प्रथिमा । प्रथीयान् । म्रदिष्ठः । म्रदिमा । म्रदीयान् । ऋतः इति किम् ? पटिष्ठः । पटिमा । पटीयान् । हलादेः इति किम् ? ऋजिष्ठः । ऋजिमा । [7]ऋजीयान् । लघोः इति किम् ? कृष्ण – कृष्णिष्ठः । कृष्णिमा । [8]कृष्णीयान् । परिगणनमत्र कर्तव्यम् ।

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥

[9]ततः इह न भवति, कृतमाचष्टे कृतयति । [10]मातरमाचष्टे मातयति । भ्रातयति ॥

## विभाषर्जोश्छन्दसि । (१६२/३५५५)

ऋजु इत्येतस्य ऋतः स्थाने [11]विभाषा रेफ आदेशो भवति इष्ठेमेयस्सु परतः छन्दसि [12]विषये । ‘रजिष्ठमनु नेषि पन्थाम्’ (ऋ. १.९१.१) । [13]त्वमृजिष्ठः ॥

---

1. हि नास्ति फ. 2. आदेशः नास्ति फ, भूभावः ह. 3. ज्या इत्येतस्मात् फ. 4. इयस्शब्दस्य फ. 5. यिडागमेन फ. 6. रेफः क. ब. 7. ऋजीयान् नास्ति ब. 8. कृष्णीयान् नास्ति ब. 9. तेन फ. 10. मातरमाचष्टे नास्ति फ. 11. विभाषा नास्ति फ. 12. विषये नास्ति फ. 13. स त्वमृजिष्ठः । ऋजिष्ठमेति पन्थानम् । स त्वं रजिष्ठः ह.